Sl. No. 263 D–DTN–J–TLB

SANSKRIT

Paper—II

(Literature)

Time Allowed : Three Hours	Maximum Marks : 300

INSTRUCTIONS

Candidates should attempt Question Nos. 1 and 5 which are compulsory, and any THREE of the remaining questions, selecting at least ONE question from each Section.

The number of marks carried by each question is indicated at the end of the question.

Question Nos. 4, 5 and 6 must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.

Answers written in Sanskrit must be in Devanagari script.

Section—A

1. ''कादम्बरीरसज्ञानाम् आहारोऽपि न रोचते'' इति कथनं कादम्बरीमवलम्ब्य विस्तरेण समीक्ष्यताम्। 60

2. अर्थशास्त्रस्य जनहितरक्षणोपायानां मूल्याङ्कनं क्रियताम्। 60

Optional Province · optionalprovince.com

3. कयोरपि द्वयोः विषये संक्षेपेण लिखत—— 30×2=60

(क) अभिज्ञानशाकुन्तले महर्षेः कण्वस्य चरित्रम्

(ख) रत्नावलीनाटिकायां श्रीहर्षस्य नाट्यकौशलम्

(ग) मुद्राराक्षसनाटके चन्द्रगुप्तस्य चरित्रम्

4. अधस्तनविषयेषु नागराक्षरैः संस्कृतभाषायां संक्षेपेण टिप्पण्यः लिख्यन्ताम्—— 20×3=60

(क) राजतरङ्गिण्याः ऐतिहासिकं महत्त्वम्

(ख) हर्षचरितम् एकम् आख्यानकाव्यम्

(ग) अमरुशतकस्य वैलक्षण्यम्

Section—B

5. निम्नलिखितेषु **त्रीण्येव** नागराक्षरैः संस्कृतभाषायां विस्तरेण व्याख्यायन्ताम्—— 20×3=60

(क) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः॥

(ख) यं सर्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥

(ग) निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम्॥

Optional Province · optionalprovince.com

(घ) न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वचः कुञ्जरबिन्दुशोणाः।
व्रजन्ति विद्याधरसुन्दरीणाम्
अनङ्गलेखक्रिययोपयोगम्॥

6. अधोलिखितानामभिप्रायं नागराक्षरैः संस्कृतभाषया विशदयत—— 20×3=60

(क) यस्तु सर्वाणि भूतानि
आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं
ततो न विजुगुप्सते॥

(ख) अविनाशि तु तद्विद्धि
येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य
न कश्चित् कर्तुमर्हति॥

(ग) उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम्॥

7. अधोलिखितानामाशयं ससन्दर्भं स्पष्टीकुरुत—— 20×3=60

(क) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति॥

(ख) याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।

(ग) इयं हि खड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात्पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्त-वक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्यम्, इत्येतानि सहवासपरिचय-वशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता।

Optional Province · optionalprovince.com

8. अधोलिखितानां व्याख्याः प्रसङ्गपूर्वकं कार्याः — 20×3=60

(क) चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः।
तां तु देवीं न पश्यामि यस्या घोषवती प्रिया॥

(ख) साक्षात् प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहु मन्यमानः।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे! प्रणयवान् मृगतृष्णिकायाम्॥

(ग) दुःखसंवेदनायैव रामे चैतन्यमागतम्।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि॥

★ ★ ★

Optional Province · optionalprovince.com